# Shridevi Mangalashtakam

# श्रीदेवी मङ्गलाष्टकम्

## Document Information

Text title : devImangalAShTakam

File name : devImangalAShTakam.itx

Category : devii, mangala, aShTaka

Location : doc_devii

Proofread by : PSA Easwaran

Latest update : January 5, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 5, 2020

*sanskritdocuments.org*

# श्रीदेवी मङ्गलाष्टकम्

श्रीविद्या शिवनामभागनिलया कामेश्वरी सुन्दरी
सूक्ष्मस्थूलदशाविशेषितजगद्रूपेण विद्योतिनी ।
स्वांशीभूतसमस्तभूतहृदयाकाशस्वरूपा शिवा
लोकातीत मदाश्रया शिवसती कुर्यात्सदा मङ्गलम् ॥ १॥

दुर्गा भर्गमनोहरा सुरनरैः संसेव्यमाना सदा
दैत्यानां सुविनाशिनी च महतां साक्षात् फलादायिनी ।
स्वप्ने दर्शनदायिनी परमुदं सन्धायिनी शाङ्करी
पापघ्नी शुभकारिणी सुमुदिता कुर्यात्सदा मङ्गलम् ॥ २॥

बाला बालार्कवर्णाढ्या सौवर्णाम्बरधारिणी ।
चण्डिका लोककल्याणी कुर्यान्मे मङ्गलं सदा ॥ ३॥

कालिका भीकराकारा कलिदोषनिवारिणी ।
काम्यप्रदायिनी शैवी कुर्यान्मे मङ्गलं सदा ॥ ४॥

हिमवत्पुत्रिका गौरी कैलासाद्रिविहारिणी ।
पार्वती शिववामाङ्गी कुर्यान्मे मङ्गलं सदा ॥ ५॥

वाणी वीणागानलोला विधिपत्नी स्मिताननना ।
ज्ञानमुद्राङ्कितकरा कुर्यान्मे मङ्गलं सदा ॥ ६॥

महालक्ष्मी प्रसन्नास्या धनधान्यविवर्धिनी ।
वैष्णवी पद्मजा देवी कुर्यान्मे मङ्गलं सदा ॥ ७॥

शम्भुप्रिया चन्द्ररेखा संशोभितललाटका ।
नानारूपधरा चैका कुर्यान्मे मङ्गलं सदा ॥ ८॥

मङ्गलाष्टकमेतद्धि पठतां शृण्वतां सदा ।
दद्याद्देवी शुभं शीघ्रमायुरारोग्यभाग्यकम् ॥ ९॥

इति श्रीदेवी मङ्गलाष्टकं सम्पूर्णम् ।

Proofread by PSA Easwaran

*Shridevi Mangalashtakam*

pdf was typeset on January 5, 2020

Please send corrections to *sanskrit@cheerful.com*